# Shri Dattatreya Vajrakavacham

# શ્રીદત્તાત્રેયવજ્રકવચમ્

## Document Information

Text title : dattAtreyavajrakavacham

File name : dattAtreyavajrakavacham.itx

Category : kavacha, deities_misc, dattatreya

Location : doc_deities_misc

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : rudrayAmale himavatkhaNDeumAmaheshvara sa.nvAde

Latest update : December 6, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 6, 2022

*sanskritdocuments.org*

# શ્રીદત્તાત્રેયવજ્રકવચમ્

શ્રીગણેશાય નમઃ ।

શ્રીદત્તાત્રેયાય નમઃ ।

ઋષય ઊચુઃ ।
કથં સઙ્કલ્પસિદ્ધિઃ સ્યાદ્વેદવ્યાસ કલૌ યુગે ।
ધર્માર્થકામમોક્ષાણાં સાધનં કિમુદાહૃતમ્ ॥ ૧॥

વ્યાસ ઉવાચ ।
શ‍ૃણ્વન્તુઋષયઃ સર્વે શીઘ્રં સઙ્કલ્પસાધનમ્ ।
સકૃદુચ્ચારમાત્રેણ ભોગમોક્ષપ્રદાયકમ્ ॥ ૨॥

ગૌરીશ‍ૃઙ્ગે હિમવતઃ કલ્પવૃક્ષોપશોભિતમ્ ।
દીપ્તે દિવ્યમહારત્નહેમમણ્ડપમધ્યગમ્ ॥ ૩॥

રત્નસિંહાસનાસિનં પ્રસન્નં પરમેશ્વરમ્ ।
મન્દસ્મિતમુખામ્ભોજં શઙ્કરં પ્રાહ પાર્વતી ॥ ૪॥

શ્રીદેવ્યુવાચ ।
દેવદેવ મહાદેવ લોકશઙ્કર શઙ્કર ।
મન્ત્રજાલાનિ સર્વાણિ યન્ત્રજાલાનિ કૃત્સ્નશઃ ॥ ૫॥

તન્ત્રજાલાન્યનેકાનિ મયા ત્વત્તઃ શ્રુતાનિ વૈ ।
ઇદાનીં દ્રષ્ટુમિચ્છામિ વિશેષેણ મહીતલમ્ ॥ ૬॥

ઇત્યુદીરિતમાકર્ણ્ય પાર્વત્યા પરમેશ્વરઃ ।
કરેણામૃજ્ય સન્તોષાત્પાર્વતીં પ્રત્યભાષત ॥ ૭॥

મયેદાનીં ત્વયા સાર્ધં વૃષમારુહ્ય ગમ્યતે ।
ઇત્યુક્ત્વા વૃષમારુહ્ય પાર્વત્યા સહ શઙ્કરઃ ॥ ૮॥

યયૌ ભૂમણ્ડલં દ્રષ્ટું ગૌર્યાશ્ચિત્રાણિ દર્શયન્ ।
ક્વચિત્ વિન્ધ્યાચલપ્રાન્તે મહારણ્યે સુદુર્ગમે ॥ ૯॥

તત્ર વ્યાહર્તુમાયાન્તં ભિલ્લં પરશુધારિણમ્ ।
વર્ધ્યમાનં મહાવ્યાઘ્રં નખદંષ્ટ્રાભિરાવૃતમ્ ॥ ૧૦॥

અતીવ ચિત્રચારિત્ર્યં વજ્રકાયસમાયુતમ્ ।
અપ્રયત્નમનાયાસમખિલં સુખમાસ્થિતમ્ ॥ ૧૧॥

પલાયન્તં મૃગં પશ્ચાદ્વ્યાઘ્રો ભીત્યા પલાયિતઃ ।
એતદાશ્ચર્યમાલોક્ય પાર્વતી પ્રાહ શઙ્કરમ્ ॥ ૧૨॥

શ્રીપાર્વત્યુવાચ ।
કિમાશ્ચર્યં કિમાશ્ચર્યમગ્રે શમ્ભો નિરીક્ષ્યતામ્ ।
ઇત્યુક્તઃ સ તતઃ શમ્ભુર્દૃષ્ટ્વા પ્રાહ પુરાણવિત્ ॥ ૧૩॥

શ્રીશઙ્કર ઉવાચ ।
ગૌરિ વક્ષ્યામિ તે ચિત્રમવાઙ્માનસગોચરમ્ ।
અદૃષ્ટપૂર્વમસ્માભિર્નાસ્તિ કિઞ્ચન્ન કુત્રચિત્ ॥ ૧૪॥

મયા સમ્યક્ સમાસેન વક્ષ્યતે શ◌ૃણુ પાર્વતિ ।
અયં દૂરશ્રવા નામ ભિલ્લઃ પરમધાર્મિકઃ ॥ ૧૫॥

સમિત્કુશપ્રસૂનાનિ કન્દમૂલફલાદિકમ્ ।
પ્રત્યહં વિપિનં ગત્વા સમાદાય પ્રયાસતઃ ॥ ૧૬॥

પ્રિયે પૂર્વં મુનીન્દ્રેભ્યઃ પ્રયચ્છતિ ન વાઞ્છતિ ।
તેઽપિ તસ્મિન્નપિ દયાં કુર્વતે સર્વમૌનિનઃ ॥ ૧૭॥

દલાદનો મહાયોગી વસન્નેવ નિજાશ્રમે ।
કદાચિદસ્મરત્ સિદ્ધં દત્તાત્રેયં દિગમ્બરમ્ ॥ ૧૮॥

દત્તાત્રેયઃ સ્મર્તૃગામી ચેતિહાસં પરીક્ષિતુમ્ ।
તત્ક્ષણાત્સોઽપિ યોગીન્દ્રો દત્તાત્રેયઃ સમુત્થિતઃ ॥ ૧૯॥

તં દૃષ્ટ્વાઽઽશ્ચર્યતોષાભ્યાં દલાદનમહામુનિઃ ।
સમ્પૂજ્યાગ્રે નિષીદન્તં દત્તાત્રેયમુવાચ તમ્ ॥ ૨૦॥

મયોપહૂતઃ સમ્પ્રાપ્તો દત્તાત્રેય મહામુને ।
સ્મર્તૃગામી ત્વમિત્યેતત્ કિંવદન્તી પરીક્ષિતુમ્ ॥ ૨૧॥

મયાદ્ય સંસ્મૃતોઽસિ ત્વમપરાધં ક્ષમસ્વ મે ।

દત્તાત્રેયો મુનિં પ્રાહ મમ પ્રકૃતિરીદૃશી ॥ ૨૨॥

અભક્ત્યા વા સુભક્ત્યા વા યઃ સ્મરેન્મામનન્યધીઃ ।
તદાનીં તમુપાગત્ય દદામિ તદભીપ્સિતમ્ ॥ ૨૩॥

દત્તાત્રેયો મુનિં પ્રાહ દલાદનમુનીશ્વરમ્ ।
યદિષ્ટં તદ્વૃણીષ્વ ત્વં યત્ પ્રાપ્તોઽહં ત્વયા સ્મૃતઃ ॥ ૨૪॥

દત્તાત્રેયં મુનિઃ પ્રાહ મયા કિમપિ નોચ્યતે ।
ત્વચ્ચિત્તે યત્સ્થિતં તન્મે પ્રયચ્છ મુનિપુઙ્ગવ ॥ ૨૫॥

શ્રીદત્તાત્રેય ઉવાચ ।
મમાસ્તિ વજ્રકવચં ગૃહાણેત્યવદન્મુનિમ્ ।
તથેત્યઙ્ગીકૃતવતે દલાદનમુનયે મુનિઃ ॥ ૨૬॥

સ્વવજ્રકવચં પ્રાહ ઋષિચ્છન્દઃપુરઃસરમ્ ।
ન્યાસં ધ્યાનં ફલં તત્ર પ્રયોજનમશેષતઃ ॥ ૨૭॥

અસ્ય શ્રીદત્તાત્રેયવજ્રકવચસ્તોત્રમન્ત્રસ્ય,
કિરાતરૂપી મહારુદ્ર ઋષિઃ, અનુષ્ટુપ્ છન્દઃ,
શ્રીદત્તાત્રેયો દેવતા, દ્રાં બીજં, આં શક્તિઃ,
ક્રૌં કીલકં, ૐ આત્મને નમઃ । ૐ દ્રીં મનસે નમઃ ।
ૐ આં દ્રીં શ્રીં સૌઃ ૐ ક્લાં ક્લીં ક્લૂં ક્લૈં ક્લૌં ક્લઃ ।
શ્રીદત્તાત્રેયપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

અથ કરન્યાસઃ ।
ૐ દ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ દ્રીં તર્જનીભ્યાં નમઃ ।
ૐ દ્રૂં મધ્યમાભ્યાં નમઃ ।
ૐ દ્રૈં અનામિકાભ્યાં નમઃ ।
ૐ દ્રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ દ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અથ હૃદયાદિન્યાસઃ ।
ૐ દ્રાં હૃદયાય નમઃ ।
ૐ દ્રીં શિરસે સ્વાહા ।
ૐ દ્રૂં શિખાયૈ વષટ્ ।

ૐ દ્રૈં કવચાય હું ।
ૐ દ્રૌં નેત્રત્રયાય વૌષટ્ ।
ૐ દ્રઃ અસ્ત્રાય ફટ્ ।
ૐ ભૂર્ભુવઃસ્વરોમિતિ દિગ્બન્ધઃ ॥

અથ ધ્યાનમ્ ।
જગદઙ્કુરકન્દાય સચ્ચિદાનન્દમૂર્તયે ।
દત્તાત્રેયાય યોગીન્દ્રચન્દ્રાય પરમાત્મને ॥ ૧॥

કદા યોગી કદા ભોગી કદા નગ્નઃ પિશાચવત્ ।
દત્તાત્રેયો હરિઃ સાક્ષાદ્ભુક્તિમુક્તિપ્રદાયકઃ ॥ ૨॥

વારાણસીપુરસ્નાયી કોલ્હાપુરજપાદરઃ ।
માહુરીપુરભિક્ષાશી સહ્યશાયી દિગમ્બર ॥ ૩॥

ઇન્દ્રનીલસમાકારશ્ચન્દ્રકાન્તિસમદ્યુતિઃ ।
વૈડુર્યસદૃશસ્ફૂર્તિશ્ચલત્કિઞ્ચિજ્જટાધરઃ ॥ ૪॥

સ્નિગ્ધધાવલ્યયુક્તાક્ષોઽત્યન્તનીલકનીનિકઃ ।
ભ્રૂવક્ષઃશ્મશ્રુનીલાઙ્કઃ સશાઙ્કસદૃશાનનઃ ॥ ૫॥

હાસનિર્જિતનીહારઃ કણ્ઠનિર્જિતકમ્બુકઃ ।
માંસલાંસો દીર્ઘબાહુઃ પાણિનિર્જિતપલ્લવઃ ॥ ૬॥

વિશાલપીનવક્ષાશ્ચ તામ્રપાણિર્દલોદરઃ ।
પૃથુલશ્રોણિલલિતો વિશાલજઘનસ્થલઃ ॥ ૭॥

રમ્ભાસ્તમ્ભોપમાનોરુર્જાનુપૂર્વૈકજઙ્ઘકઃ ।
ગૂઢગુલ્ફઃ કૂર્મપૃષ્ઠોલસત્પાદોષરિસ્થલઃ ॥ ૮॥

રક્તારવિન્દસદૃશરમણીયપદાધરઃ ।
ચર્મામ્બરધરો યોગી સ્મર્તૃગામી ક્ષણે ક્ષણે ॥ ૯॥

જ્ઞાનોપદેશનીરતો વિપદ્ધરણદીક્ષિતઃ ।
સિદ્ધાસનસમાસીન ઋજુકાયો હસન્મુખઃ ॥ ૧૦॥

વામહસ્તેન વરદો દક્ષિણેનાભયઙ્કરઃ ।
બાલોન્મત્તપિશાચીભિઃ ક્વચિદ્યુક્તઃ પરીક્ષિતઃ ॥ ૧૧॥

ત્યાગી ભોગી મહાયોગી નિત્યાનન્દો નિરઞ્જનઃ ।

સર્વરૂપી સર્વદાતા સર્વગઃ સર્વકામદઃ ॥ ૧૨॥

ભસ્મોદ્ધૂલિતસર્વાઙ્ગો મહાપાતકનાશનઃ ।
ભુક્તિપ્રદો મુક્તિદાતા જીવન્મુક્તો ન સંશયઃ ॥ ૧૩॥

એવં ધ્યાત્વાઽનન્યચિત્તો મદ્વજ્રકવચં પઠેત્ ।
મામેવ પશ્યન્સર્વત્ર સ મયા સહ સઞ્ચરેત્ ॥ ૧૪॥

દિગમ્બરં ભસ્મસુગન્ધલેપનં ચક્રં ત્રિશૂલં ડમરું ગદાયુધમ્ ।
પદ્માસનં યોગિમુનીન્દ્રવન્દિતં દત્તેતિ નામસ્મરણેન નિત્યમ્ ॥ ૧૫॥

(અથ પઞ્ચોપચારૈઃ સંપૂજ્ય ૐ દ્રાં ઇતિ અષ્ટોત્તરશતવારં જપેત્)
ૐ દ્રામ્ ।

અથ કવચમ્ ।
ૐ દત્તાત્રેયઃ શિરઃ પાતુ સહસ્રાબ્જેષુ સંસ્થિતઃ ।
ભાલં પાત્વાનસૂયેયશ્ચન્દ્રમણ્ડલમધ્યગઃ ॥ ૧॥

કૂર્ચં મનોમયઃ પાતુ હં ક્ષં દ્વિદલપદ્મભૂઃ ।
જ્યોતિરૂપોઽક્ષિણી પાતુ પાતુ શબ્દાત્મકઃ શ્રુતી ॥ ૨॥

નાસિકાં પાતુ ગન્ધાત્મા મુખં પાતુ રસાત્મકઃ ।
જિહ્વાં વેદાત્મકઃ પાતુ દન્તોષ્ઠૌ પાતુ ધાર્મિકઃ ॥ ૩॥

કપોલાવત્રિભૂઃ પાતુ પાત્વશેષં મમાત્મવિત્ ।
સ્વરાત્મા ષોડશારાબ્જસ્થિતઃ સ્વાત્માઽવતાદ્ગલમ્ ॥ ૪॥

સ્કન્ધૌ ચન્દ્રાનુજઃ પાતુ ભુજૌ પાતુ કૃતાદિભૂઃ ।
જત્રુણી શત્રુજિત્ પાતુ પાતુ વક્ષઃસ્થલં હરિઃ ॥ ૫॥

કાદિઠાન્તદ્વાદશારપદ્મગો મરુદાત્મકઃ ।
યોગીશ્વરેશ્વરઃ પાતુ હૃદયં હૃદયસ્થિતઃ ॥ ૬॥

પાર્શ્વે હરિઃ પાર્શ્વવર્તી પાતુ પાર્શ્વસ્થિતઃ સ્મૃતઃ ।
હઠયોગાદિયોગજ્ઞઃ કુક્ષી પાતુ કૃપાનિધિઃ ॥ ૭॥

ડકારાદિફકારાન્તદશારસરસીરુહે ।
નાભિસ્થલે વર્તમાનો નાભિં વહ્ન્યાત્મકોઽવતુ ॥ ૮॥

વહ્નિતત્વમયો યોગી રક્ષતાન્મણિપૂરકમ્ ।
કટિં કટિસ્થબ્રહ્માણ્ડવાસુદેવાત્મકોઽવતુ ॥ ૯॥

બકારાદિલકારાન્તષટ્પત્રામ્બુજબોધકઃ । (વક્રાદિ)
જલતત્વમયો યોગી સ્વાધિષ્ઠાનં મમાવતુ ॥ ૧૦॥

સિદ્ધાસનસમાસીન ઊરૂ સિદ્ધેશ્વરોઽવતુ ।
વાદિસાન્તચતુષ્પત્રસરોરુહનિબોધકઃ ॥ ૧૧॥

મૂલાધારં મહીરૂપો રક્ષતાદ્વીર્યનિગ્રહી ।
પૃષ્ઠં ચ સર્વતઃ પાતુ જાન્વુન્યસ્તકરામ્બુજઃ ॥ ૧૨॥

જઙ્ઘે પાત્વવધૂતેન્દ્રઃ પાત્વઙ્ઘ્રી તીર્થપાવનઃ ।
સર્વાઙ્ગં પાતુ સર્વાત્મા રોમાણ્યવતુ કેશવઃ ॥ ૧૩॥

ચર્મ ચર્મામ્બરઃ પાતુ રક્તં ભક્તિપ્રિયોઽવતુ ।
માંસં માંસકરઃ પાતુ મજ્જાં મજ્જાત્મકોઽવતુ ॥ ૧૪॥

અસ્થીનિ સ્થિરધીઃ પાયાન્મેધાં વેધાઃ પ્રપાલયેત્ ।
શુક્રં સુખકરઃ પાતુ ચિત્તં પાતુ દૃઢાકૃતિઃ ॥ ૧૫॥

મનોબુદ્ધિમહઙ્કારં હૃષીકેશાત્મકોઽવતુ ।
કર્મેન્દ્રિયાણિ પાત્વીશઃ પાતુ જ્ઞાનેન્દ્રિયાણ્યજઃ ॥ ૧૬॥

બન્ધૂન્ બન્ધૂત્તમઃ પાયાચ્છત્રુભ્યઃ પાતુ શત્રુજિત્ ।
ગૃહારામધનક્ષેત્રપુત્રાદીઞ્છઙ્કરોઽવતુ ॥ ૧૭॥

ભાર્યાં પ્રકૃતિવિત્ પાતુ પશ્વાદીન્પાતુ શાર્ઙ્ગભૃત્ ।
પ્રાણાન્પાતુ પ્રધાનજ્ઞો ભક્ષ્યાદીન્પાતુ ભાસ્કરઃ ॥ ૧૮॥

સુખં ચન્દ્રાત્મકઃ પાતુ દુઃખાત્ પાતુ પુરાન્તકઃ ।
પશૂન્પશૂપતિઃ પાતુ ભૂતિં ભૂતેશ્વરો મમ ॥ ૧૯॥

પ્રાચ્યાં વિષહરઃ પાતુ પાત્વાગ્નેય્યાં મખાત્મકઃ ।
યામ્યાં ધર્માત્મકઃ પાતુ નૈરૃત્યાં સર્વવૈરિહૃત્ ॥ ૨૦॥

વરાહઃ પાતુ વારુણ્યાં વાયવ્યાં પ્રાણદોઽવતુ ।
કૌબેર્યાં ધનદઃ પાતુ પાત્વૈશાન્યાં મહાગુરુઃ ॥ ૨૧॥

ઉર્ધ્વં પાતુ મહાસિદ્ધઃ પાત્વધસ્તાજ્જટાધરઃ ।
રક્ષાહીનં તુ યત્સ્થાનં રક્ષત્વાદિમુનીશ્વરઃ ॥ ૨૨॥

ૐ દ્રામ્ । માલામન્ત્રજપઃ ।

(પુનઃ)
અથ કરન્યાસઃ ।
ૐ દ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ દ્રીં તર્જનીભ્યાં નમઃ ।
ૐ દ્રૂં મધ્યમાભ્યાં નમઃ ।
ૐ દ્રૈં અનામિકાભ્યાં નમઃ ।
ૐ દ્રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ દ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અથ હૃદયાદિન્યાસઃ ।
ૐ દ્રાં હૃદયાય નમઃ ।
ૐ દ્રીં શિરસે સ્વાહા ।
ૐ દ્રૂં શિખાયૈ વષટ્ ।
ૐ દ્રૈં કવચાય હું ।
ૐ દ્રૌં નેત્રત્રયાય વૌષટ્ ।
ૐ દ્રઃ અસ્ત્રાય ફટ્ ।
ૐ ભૂર્ભુવઃસ્વરોમિતિ દિગ્બન્ધઃ ॥

એતન્મે વજ્રકવચં યઃ પઠેચ્છૃણુયાદપિ ।
વજ્રકાયશ્ચિરઞ્જીવી દત્તાત્રેયોઽહમબ્રુવમ્ ॥ ૨૩॥

ત્યાગી ભોગી મહાયોગી સુખદુઃખવિવર્જિતઃ ।
સર્વત્રસિદ્ધસઙ્કલ્પો જીવન્મુક્તોઽદ્ય વર્તતે ॥ ૨૪॥

ઇત્યુક્ત્વાન્તર્દધે યોગી દત્તાત્રેયો દિગમ્બરઃ ।
દલાદનોઽપિ તજ્જપ્ત્વા જીવન્મુક્તઃ સ વર્તતે ॥ ૨૫॥

ભિલ્લો દૂરશ્રવા નામ તદાનીં શ્રુતવાદિનમ્ ।
સકૃચ્છ્રવણમાત્રેણ વજ્રાઙ્ગોઽભવદપ્યસૌ ॥ ૨૬॥

ઇત્યેતદ્વજ્રકવચં દત્તાત્રેયસ્ય યોગિનઃ ।
શ્રુત્વાશેષં શમ્ભુમુખાત્ પુનરપ્યાહ પાર્વતી ॥ ૨૭॥

પાર્વત્યુવાચ ।
એતત્કવચમાહાત્મ્યં વદ વિસ્તરતો મમ ।
કુત્ર કેન કદા જાપ્યં કિં યજાપ્યં કથં કથમ્ ॥ ૨૮॥

ઉવાચ શમ્ભુસ્તત્સર્વં પાર્વત્યા વિનયોદિતમ્ ।
શ્રીશિવ ઉવાચ ।
શ્રુણુ પાર્વતિ વક્ષ્યામિ સમાહિતમનાવિલમ્ ॥ ૨૯ ॥

ધર્માર્થકામમોક્ષાણામિદમેવ પરાયણમ્ ।
હસ્ત્યશ્વરથપાદાતિસર્વૈશ્વર્યપ્રદાયકમ્ ॥ ૩૦ ॥

પુત્રમિત્રકલત્રાદિસર્વસન્તોષસાધનમ્ ।
વેદશાસ્ત્રાદિવિદ્યાનાં નિધાનં પરમં હિ તત્ ॥ ૩૧ ॥

સઙ્ગીતશાસ્ત્રસાહિત્યસત્કવિત્વવિધાયકમ્ ।
બુદ્ધિવિદ્યાસ્મૃતિપ્રજ્ઞામતિપ્રૌઢિપ્રદાયકમ્ ॥ ૩૨ ॥

સર્વસન્તોષકરણં સર્વદુઃખનિવારણમ્ ।
શત્રુ સંહારકં શીઘ્રં યશઃકીર્તિવિવર્ધનમ્ ॥ ૩૩ ॥

અષ્ટસંખ્યા મહારોગાઃ સન્નિપાતાસ્ત્રયોદશ ।
ષણ્ણવત્યક્ષિરોગાશ્ચ વિંશતિર્મેહરોગકાઃ ॥ ૩૪ ॥

અષ્ટાદશ તુ કુષ્ઠાનિ ગુલ્માન્યષ્ટવિધાન્યપિ ।
અશીતિર્વાતરોગાશ્ચ ચત્વારિંશત્તુ પૈત્તિકાઃ ॥ ૩૫ ॥

વિંશતિશ્લેષ્મરોગાશ્ચ ક્ષયચાતુર્થિકાદયઃ ।
મન્ત્રયન્ત્રકુયોગાદ્યાઃ કલ્પતન્ત્રાદિનિર્મિતાઃ ॥ ૩૬ ॥

બ્રહ્મરાક્ષસવેતાલકૂષ્માણ્ડાદિગ્રહોદ્ભવાઃ ।
સઙ્ગજાઃ દેશકાલસ્થાસ્તાપત્રયસમુત્થિતાઃ ॥ ૩૭ ॥

નવગ્રહસમુદ્ભૂતા મહાપાતકસમ્ભવાઃ ।
સર્વે રોગાઃ પ્રણશ્યન્તિ સહસ્રાવર્તનાદ્ધ્રુવમ્ ॥ ૩૮ ॥

અયુતાવૃત્તિમાત્રેણ વન્ધ્યા પુત્રવતી ભવેત્ ।
અયુતદ્વિતયાવૃત્ત્યા હ્યપમૃત્યુજયો ભવેત્ ॥ ૩૯ ॥

અયુતત્રિતયાચ્ચૈવ ખેચરત્વં પ્રજાયતે ।
સહસ્રાદયુતાદર્વાક્ સર્વકાર્યાણિ સાધયેત્ ॥ ૪૦ ॥

લક્ષાવૃત્યા કાર્યસિદ્ધિર્ભવેત્યેવ ન સંશયઃ ॥ ૪૧ ॥

વિષવૃક્ષસ્ય મૂલેષુ તિષ્ઠન્ વૈ દક્ષિણામુખઃ ।
કુરુતે માસમાત્રેણ વૈરિણં વિકલેન્દ્રિયમ્ ॥ ૪૨ ॥

ઔદુમ્બરતરોર્મૂલે વૃદ્ધિકામેન જાપ્યતે ।
શ્રીવૃક્ષમૂલે શ્રીકામી તિન્તિણી શાન્તિકર્મણિ ॥ ૪૩॥

ઓજસ્કામોઽશ્વત્થમૂલે સ્ત્રીકામૈઃ સહકારકે ।
જ્ઞાનાર્થી તુલસીમૂલે ગર્ભગેહે સુતાર્થિભિઃ ॥ ૪૪॥

ધનાર્થિભિસ્તુ સુક્ષેત્રે પશુકામૈસ્તુ ગોષ્ઠકે ।
દેવાલયે સર્વકામૈસ્તત્કાલે સર્વદર્શિતમ્ ॥ ૪૫॥

નાભિમાત્રજલે સ્થિત્વા ભાનુમાલોક્ય યો જપેત્ ।
યુદ્ધે વા શાસ્ત્રવાદે વા સહસ્રેણ જયો ભવેત્ ॥ ૪૬॥

કણ્ઠમાત્રે જલે સ્થિત્વા યો રાત્રૌ કવચં પઠેત્ ।
જ્વરાપસ્મારકુષ્ઠાદિતાપજ્વરનિવારણમ્ ॥ ૪૭॥

યત્ર યત્સ્યાત્સ્થિરં યદ્યત્પ્રસન્નં તન્નિવર્તતે ।
તેન તત્ર હિ જપ્તવ્યં તતઃ સિદ્ધિર્ભવેદ્ધ્રુવમ્ ॥ ૪૮॥

ઇત્યુક્ત્વાન્ ચ શિવો ગૌર્યે રહસ્યં પરમં શુભમ્ ।
યઃ પઠેત્ વજ્રકવચં દત્તાત્રેયોસમો ભવેત્ ॥ ૪૯॥

એવં શિવેન કથિતં હિમવત્સુતાયૈ
    પ્રોક્તં દલાદમુનયેઽત્રિસુતેનપૂર્વમ્ ।
યઃ કોઽપિ વજ્રકવચં પઠતીહ લોકે
    દત્તોપમશ્ચરતિ યોગિવરશ્ચિરાયુઃ ॥ ૫૦॥

॥ ઇતિ શ્રીરુદ્રયામલે હિમવત્ખણ્ડે મન્ત્રશાસ્ત્રે ઉપાસનાખણ્ડે
શિવવિજયસિદ્ધાન્તે ઉમામહેશ્વરસંવાદે
શ્રીદત્તાત્રેયવજ્રકવચસ્તોત્રં સમ્પૂર્ણમ્ ॥

॥ શ્રીદત્તાત્રેયાર્પણમસ્તુ ।

Encoded and proofread by Ravin Bhalekar ravibhalekar at hotmail.com

*Shri Dattatreya Vajrakavacham*

pdf was typeset on December 6, 2022

Please send corrections to *sanskrit@cheerful.com*